## Saltora Netaji Centenary College

## B.A. 1st Semester Class Test Exam. - A.Y 2023-24

## Sanskrit (Major)

## Course Code: A/SNS/101/MJC-1

## Course Title: General Grammar with translation & Metre

**Time -2 hours** **Full marks -40**

**1) अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः। तेषु द्वयोः उत्तरम् अवश्यमेव संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्।** **2×5=10**

क) यतिः का भवति ?

ख) किं नाम पद्यम् ? तत् कतिविधम् ? के च ते?

ग) किं नाम वृत्तम् ? तत् कतिविधम् ? कानि च तानि ?

घ) जातिवृत्तयोर्मध्ये पार्थक्यं किम् अस्ति ?

ङ) संस्कृतलौकिकछन्दसि कति गणाः सन्ति ? के च ते ?

च) मित्रो मे समुपस्थितः। इत्यस्य शुद्धिः कार्या।

छ) महाराजा अश्वेन सञ्चरति। इत्यस्य शुद्धिः कार्या।

ज) नाहं यशं लिप्सामि। इत्यस्य शुद्धिः कार्या।

**2) अधोलिखितेषु यथेच्छं चत्वारः प्रश्नाः समाधेयाः।** **5×4=20**

**I) परिनिष्ठितरूपं विलिख्य यथेच्छं पञ्चभिः वाक्यानि विरच्यन्ताम्।** **1×5=5**

क) लभ्-धातोः क्तप्रत्यये पुंलिङ्गे प्रथमैकवचने

ख) प्र-आप् धातोः ल्यप्-प्रत्यययोगे

ग) विद्- धातोः शानच्-प्रत्यये पुलिङ्गे प्रथमैकवचने

ङ) पठ्-धातोः क्तवतुप्रत्यये पुंलिङ्गे प्रथमैकवचने

क) पठ्धातोः क्तप्रत्यये पुंलिङ्गे प्रथमैकवचने

ख) प्र-नम् धातोः ल्यप्-प्रत्यययोगे

ग) सेव्-धातोः शानच्-प्रत्यये पुंलिङ्गे प्रथमैकवचने

ङ) गम्-धातोः क्तवतुप्रत्यये पुंलिङ्गे प्रथमैकवचने

**ii) अधोलिखितेषु यथेच्छं पञ्चकस्य व्युत्पत्तिर्निर्णेया ।** **1×5=5**

दर्शनीयः, ग्रहीतव्यः, पक्वः, जानन्, विद्यमाना, त्यक्त्वा, परित्यज्य

**iii) अधोलिखितेषु यथेच्छं पञ्चकस्य परिनिष्ठितरूपं लिख्यताम् ।** **1×5=5**

आ-गम् + ल्यप्, सेव् + शानच्, आ-दा + ल्यप्, नम् + क्त्वा, दृश् + क्तवतु, चि + तुमुन्, गम् + शतृ

**iv) अधोलिखितेषु रेखाङ्कितपदेषु यथेच्छं पञ्चकस्य ससूत्रं कारकविभक्तिर्निर्णेया।** **1×5=5**

(f) <u>सरस्वत्यै</u> नमः।

(g) <u>दरिद्रेभ्यः</u> राजा वस्त्रं यच्छति।

(a) अश्वः <u>मन्दं</u> धावति।

(b) <u>गुरोः</u> शास्त्रम् अधीते।

(c) <u>मासं</u> व्याकरणमपठत्।

(d) <u>कुण्डलाय</u> हिरण्यम्।

(e) बालकः <u>कटे</u> आस्ते।

(f) <u>सूर्ये</u> उदिते पद्मं प्रकाशते।

**v) अधोलिखितेषु अव्ययपदेषु यथेच्छं पञ्चकेन वाक्यानि रचनीयानि । 1×5=5**

कुत्र, इदानीम्, नक्तम्, वृथा, यदा, अत्र, अकस्मात्, सकृत्

**vi) निम्नलिखितेषु पञ्चानां वाक्यानां वाच्यपरिवर्तनं विधेयम्। 1×5=5**

क) बालकः चन्द्रं पश्यति।

ख) गोपः गां दुग्धं दोग्धि।

ग) गुरुः शिष्यं धर्मं बोधयति।

घ) सः ग्रामं गतः।

ङ) रामः विद्यालयं गतवान्।

च) बालकः तिष्ठति।

छ) बालिका गीतवती।

ज) स स्थास्यति।

**vii) निम्नलिखितेषु पञ्च रिक्तस्थानानि पूरणीयानि। 1×5=5**

(क) रामः मातरं ____________(प्र-नम् + ल्यप्) वनं गतवान्।

(ख) बालकः ____________ (ग्राम) अधिवसति।

(ग) बालकाः ____________ (पादकन्दुक) दीव्यन्ति।

(घ) स ________ (जाति) ब्राह्मणः।

(ङ) रजकाय वस्त्रं ___________ (दा + लट्)।

(च) शिशुः ___________ (शय्या) शेते।

(छ) __________ (पर्वत) हिमालयः उच्चतमः।

**3) अधोलिखितेषु यथेच्छं एकः प्रश्नः समाधेयः। 10×1=10**

**i) यथेच्छं द्वयम् आश्रित्य टीका लेख्या। 5×2=10**

वसन्ततिलकम्, शिखरिणी, स्रग्धरा

**ii) अधोनिर्दिष्टेषु चरणद्वयस्य छन्दोनिरूपणं कार्यम्। 5×2=10**

a) हितं मनोहारि च दुर्लभं वचः।

b) न विवृतो मदनो न च संवृतः।

c) अर्थो हि कन्या परकीय एव।

d) आकाशमाविष्कृतचारुतारम्।

**ii) संस्कृतभाषायां देवनागरीलिप्या अनुवादः कार्यः । 10**

প্রাচীন ঐতিহ্যের দেশ এই ভারতবর্ষ। পৃথিবীর ভাষাসমূহের মধ্যে সংস্কৃতভাষা প্রাচীনতমা। এই ভাষা ভারতীয় সভ্যতার ধারক ও বাহক। নিয়মানুবর্তিতা ছাত্রজীবনের প্রাণস্বরূপ। ছাত্ররাই আমাদের দেশের ভাবী নাগরিক।

Saltora Netaji Centenary College

B.A 1st Semester Test Examination 2023-2024

Subject - Sanskrit

Course Code:- A/SNS/104/SEC-1

Corse Title - Spoken Sanskrit and computer Application

Time : 2 hours | Full Marks : 40

**क) समीचीनमुत्तरं चिनतु (✓) (MCQ)** 2 × 20 = 40

## SPOKEN SANSKRIT

१) वृक्षात् ____ पत्राणि पतन्ति ।

(a) पक्वम् (b) पक्वानि (c) पक्वा (d) पक्वाः।

२) निर्धारणे का विभक्तिः ?

(a) प्रथमा (b) द्वितीया (c) षष्ठी (d) पञ्चमी।

३) सुशीलः विद्यालयं **गमिष्यति** – रेखाङ्कितपदे कः लकारः?

(a) लट् (b) लोट् (c) लृट् (d) लङ् ।

४) नेताजी ___ देशप्रेमिकः।

(a) श्रेष्ठः (b) श्रेष्ठाः (c) श्रेष्ठम् (d) श्रेष्ठौ ।

५) **परितः** इति पदस्य योगे का विभक्तिः ?

(a) द्वितीया (b) तृतीया (c) चतुर्थी (d) षष्ठी।

६) बालकेन खादितः _____ । (रिक्तस्थाने समीचीनं पदं लिखतु)

(a) खादितः (b) खादिताः (c) खादितम् (d) खादिता ।

७) _____ सूर्यः पूर्वदिशि उदेति।

(a) प्रातः (b) प्रातम् (c) प्राते (d) प्रात ।

८) गम् धातोः उत्तमपुरुषस्य एकवचने ___

(a) गमिष्यति (b) गमिष्यामि (c) गच्छामः (d) गच्छामः ।

९) वालकः चन्द्रं पश्यति – वाच्यपरिवर्तने

a) वालकः चन्द्रं दर्शयति (b) वालकः चन्द्रः दृश्यते (c) वालकेन चन्द्रः दृश्यते (d) वालकेन चन्द्रं दृश्यते।

१०) सेव् + तुमुन् = ?

(a) सेवितुम् (b) सेवतुम् (c) सिवितुम् (d) सेतुम् ।

## COMPUTER APPLICATION

11) **ALU** is

a) Arithmetic Logic Unit b) Application Logic Unit c) Array Logic Unit d) None of above.

12) 1 Byte = ?

a) 8 bits b) 4 bits c) 2 bits d) 9 bits .

13) How many types of Computer ?

a) Two b) Three c) Four d) Five .

14) Which of the following is valid storage types ?

a) CPU b) Keyboard c) Pendrive d) Track ball.

15) What is brain of Computer ?

a) ALU b) RAM c) Software d) CPU .

16) Frist page of Website is termed is

a) Home Page b) Index c) JAVA Script d) Book Mark .

17) Who is father of Computer ?

a) Charles Babbage b) Allen Turing c) Simur Cray d) Augusta Adaming .

18) Which of the following is not a binary number ?

a) 001 b) 202 c) 101 d) 110 .

19) Ctrl+ c is used for

a) Refreshing Web Page b) Copy c) Paste d) Find the Text .

20) Which of the following is not an input device ?

a) Plamtop b) Laptop c) Tablet d) LAN .

Saltora Netaji Centenary College

B.A. 3d Semester (Honours) Test Examination- 2023-24

Subject: SANSKRIT(Honours)

Course ID: 30911 Course Code: AHSNS-301C-5

Course Title: Vedic Literature

Time: 2 hrs Full Marks: 40

**1. अधोलिखितेषु पञ्च प्रश्नाः समाधेयाः। एकस्य उत्तरम् अवश्यमेव सुरगिरा देवनागरीलिप्या च लेखनीयम्।** 2 x 5 =10

a) किं नाम सूक्तम् ? ऋग्वेदसंहितायां कति सूक्तानि प्राप्यन्ते ?

b) 'हिरण्यगर्भ' इति पदस्य कोऽर्थः?

c) इन्द्रसूक्तस्य सजनीयसूक्तमिति नाम कथम् ?

d) पदपाठे इति - प्रयोगस्य नियमद्वयं सोदाहरणं लेख्यम् ?

e) अग्निसूक्तस्य ऋषिः कः? किं च छन्दः?

f) स्तोत्रं नाम किम् ? किं च शस्त्रम् ?

g) वैदिकसाहित्ये कस्य देवस्य कृते अधिकानि सूक्तानि प्राप्यन्ते ? याज्या पुरोऽनुवाक्या चेति शब्दद्वयस्य कोऽर्थः ?

h) हिरण्यगर्मसूक्ते कस्मै पदस्य कोऽर्थः?

**2. कस्यचिदेकस्य भाष्यवचनस्य सुरगिरा देवनागरीलिप्या च व्याख्या कार्या।** 5X1=5

a) अग्निमीले इति सूक्तं प्रातरनुवाके आग्नेयक्रतौ विनियुक्तम् ।

b) अभिप्लवषडहस्य मध्यवर्तिष्क्थ्येषु तृतीयसवने मैत्रावरुणस्य अग्ने यं यज्ञम् इत्यादिको वैकल्पिको- नुरूपस्तृचः ।

**3. अधस्तात् कस्यचिदेकस्य मन्त्रस्य ऋषिच्छन्दोदेवताविनियोगान् उल्लिख्य सुरगिरा देवनागरीलिप्या च व्याख्या कार्या।**

**5 X 1=5**

a. अ॒ग्निर्होता॑ क॒विक्र॑तुः

स॒त्यश्चि॒त्रश्र॑वस्तमः।

दे॒वो दे॒वेभि॒रा गम॑त्॥

b) अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒

रीड्यो॒ नूत॑नैरु॒त।

स दे॒वाँ एह व॑क्षति॥

4. उपर्युक्तयोः [3. (a), (b) इत्यनयोः] मन्त्रयोः कस्यचिदेकस्य मन्त्रस्य पदपाठो विधेयः । **5X1 = 5**

**5. अधोनिर्दिष्टेषु एकम् आश्रित्य टीका लेख्या ।** **5X1=5**

वैदिकतुमर्थप्रत्ययः, लेट्लकारः, वैदिकं शब्दरूपम् ।

**6. अधस्तात् कस्यचिदेकस्य प्रश्नस्योत्तरं वैशद्येन संस्कृतभाषया देवनागरीलिप्या च विधेयम्10x1=10**

a) स्वपाठ्यानुसारम् इन्द्रदेवस्य चारित्रिकवैशिष्ट्यं पर्यालोचनीयम् ।

b) हिरण्यगर्भसूक्तं दार्शनिकसूक्तं न वेति विशदतया विचार्यताम् ।

c) अक्षनिन्दा कृषिमाहात्यं च सूक्तमध्ये यथा दृश्यते सूक्तमाश्रित्य तत्सर्व विशद्यताम् ।

Saltora Netaji Centenary College

B.A. 3rd Semester (Honours) Test Examination - A.Y 2023-24

Sanskrit (Honours)

Course Id: 30912 Course Code: AHSNS 302C-6

Course Title: Indian Social Institutions and Polity

Time -2 hours Full Marks -40

**1. अधोलिखितेषु यथेच्छं पञ्चानाम् उत्ताराणि लिखित। एकस्य उत्तरम् अवश्यमेत्र संस्कृतभाष्या देवनागरीलिप्टा च देयम्। (2x5=10)**

a) व्यसनं कतिविधम्, कानि च तानि।

b) याज्ञवल्क्यसंहितानुसारेण वृद्धिविभागा लेख्याः।

c) कीदृद्धान् अमात्यान् राजा प्रकुर्वीत।

d) सर्वतेजोमयो हि सः कः कथं सर्वतेजोमयः?

e) दुर्गः कतिविधः? दुर्गेषु श्रेष्ठो दुर्गः कः ?

f) का नाम आन्वीक्षिकी ?

g) त्रैविद्येभ्यस्त्रयों विद्यात् दण्डनीतिञ्च शाश्वतीम् इत्यस्य तात्पर्यं लिख्यताम्।

h) जाङ्गलं शस्यसम्पन्नम् आर्यप्रायम् अनाविलम् इत्यस्य तात्पर्यं लिख्यताम्।

**2. यथेच्छं द्वयोः श्लोकयोः सप्रसङ्गव्याख्या संस्कृतभाषया देवनागरीलिपिम् आश्रित्य कार्या। (5x2=10)**

a) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता होषा नररूपेण तिष्ठति।।

b) यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः।
शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः॥

c) त्रैविद्येभ्यस्त्रयीं विद्यात् दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः।।

**3. यथेच्छेम् एकस्य संस्कृतभाषया देवनागरीलिप्या मप्रसङ्गव्याख्या कार्या। (5x1=5)**

a) कौटिल्यमतेन मन्त्रीगुजान् प्रतिपादयत।

b) अर्थशास्रानुसारम् इन्द्रिवजयमाश्रित्य टीका लेख्या।

**4. अधोनिर्दिष्टयोः एकः प्रश्नः संस्कृतभाषया देवनागरीलिप्या च समाधेयः (5x1=5)**

a) अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके।
वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा।।- व्याख्यायताम्।

b. स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः।
अर्थशाखात्तु बलवद धर्मशास्त्रमिति स्थितिः॥

**5. रुध्यन एकः प्रश्नः संस्कृतभाषया देवनागरीलिपिम् आश्रित्य समाधेयः। (10x1=10)**

a) मनुसंहितानुसारं राज्यशासने दण्डस्य गुरुत्वं वैशद्येन आलोचनीयम्।

b) अर्थशास्त्रानुसारम् विद्यामाश्रित्य कश्चन निबन्धो लेख्यः।

C) याज्ञवल्क्यसंहितामनुसृत्य व्यवहारस्वरूपं प्रतिपाद्यताम्।

---

Saltora Netaji Centenary College

B.A. 3rd Semester (Honours) Test Examination - A.Y 2023-24

Sanskrit (Honours)

Course Id: 30913 Course Code: AHSNS 303C-7

Course Title: Theory of Self

Time -2 hours Full Marks -40

**क) अधोलिखितेषु पञ्चप्रश्नानाम् उत्तराणि लिखत। एकस्य उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्।** 2×5=10

१) 'वेदान्तसारः' कीदृशः ग्रन्थः? अस्य मङ्गलाचरणश्लोके कस्य स्तुतिः विहिता?

२) 'वेदान्तसारः' ग्रन्थस्य रचयिता कः? तस्य गुरोर्नाम किम?

३) 'वेदान्तः' शब्दस्य कोऽर्थः?

४) अनुबन्धः कतिविधः ? के च ते?

५) वेदान्तसारानुसारं कर्म कतिविधम् ? कानि च तानि?

६) साधनानि कतिविधानि ? कानि च तानि?

७) का नाम शमादिषट्कसम्पत्तिः ?

८) कः नाम अध्यारोपः?

**ख) द्वयोः संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या।** 5x2=10

१) "सा होवाच मैत्रेयी येनाहं नामृता स्याम्, किमहं तेन कुर्याम्, यदेव भगवान् वेद तदेव मे ब्रूहीति ।।"

२) "स यथा वीणायै वाद्यमानायै न बाह्यान्शब्दाशक्नुयाद् ग्रहणाय, वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः।।"

३) "सा होवाच मैत्रेयी। यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् कथं तेनामृता स्यामिति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य नाशास्ति वित्तेनेति।।"व्याख्या करणीया

**ग) द्वयोः संस्कृतभाषया देवनागरीलिप्वा च व्याख्या कार्या।** 5x2=10

१) यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥

२) अनन्दा नाम ते लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधो जनाः॥

३) मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।।

४) अन्धं तमः प्रविशन्ति ये ऽविद्यामुपासते।
ततो भूव इव ते तमो य उ विद्यायां रताः।।

**घ) त्रिषु एकस्य प्रश्नस्य उत्तरं संस्कृतभाषया देवनागरीलिप्या लिखत।** 10x1=10

१) वेदान्तसारस्य मङ्गलाचरणश्लोकस्य व्याख्या कार्या।

२) किं नाम साधनचतुष्टयम्? वेदान्तसारमनुसृत्य व्याख्यायताम्।

३) वेदान्तसारमनुसृत्य अज्ञानस्य स्वरूपं व्याख्यायताम्। अज्ञानस्य शक्तिद्वयम् संक्षेपेण आलोच्यताम्।

-------

Saltora Netaji Centenary College

B.A 3rd Semester Honours Test Examination 2023-2024

Subject – Sanskrit

Course Id - 30915 Course Code:- AH SNS-305-SEC-1

Corse Title - Spoken Sanskrit and computer Application

Time : 2 hours Full Marks : 40

क) समीचीनमुत्तरं चिनतु (✓) (MCQ)। 2 × 20=40

## SPOKEN SANSKRIT

१) अहं रामायणं पठामि– इत्यस्य वाच्यपरिवर्तने –

(a) मया रामायणः पठ्यते (b) मया रामायणं पठ्यते (c) मया रामायणः पठ्यन्ते (d) मया रामायणं पठ्यन्ते ।

२) लिख् धातोः प्रथमपुरुषस्य बहुवचने –

(a) लिखति (b) लिखतु (c) लिखन्ति (d) लिखामि

३) ______ पुष्पाणि।

(a) सुन्दराणि (b) सुन्दरानि (c) सुन्दरम् (d) सून्दराः।

४) गगने _____ चन्द्रः भाति।

a) निर्मलः (b) निर्मलाः (c) निर्मलानि (d) निर्मले ।

५) आदेशार्थे कस्य लकारस्य प्रयोगः भवति ?

(a) लृट् (b) लोट् (c) लिट् (d) लङ्

६) उपलक्षणे तृतीयाविभक्तेः उदाहरणम् यथा

a) पिता पुत्रेण गच्छति। b) दुःखेन क्रन्दति भिक्षुकः। c) चक्षुषा कानः रमेशः। d) जटाभिः तापसम् अपश्यम्।

७) कर्तृवाच्यप्रयोगे तु _____ कर्तृकारके।

a) तृतीया b) प्रथमा c) द्वितीया d) पञ्चमी

८) शिशुना चन्द्रः ______।

a) पश्यति b) पश्यन्ति c) दृश्यते d) दृश्यन्ते।

९) आ-√नी+ल्यप् = ?

a) आनाय b) आनीय c) आनिय d) आनीत ।

१०) पीताम्बरः पदे कः समासः ?

a) कर्मधारयः b) बहुव्रीहिः c) तत्पुरुषः d) अव्ययीभावः ।

## COMPUTER APPLICATION

1) Who is the father of computer :

a)Jhon Bucar b) Steven Son c) charls Babbage d) None of these

2) What is the Brain of Computer :

a) ALU b) RAM c) Software d) CPU

3) which of these is input Device :

a) Moniter b) CPU c) Speaker d)track ball

4) Which of the following is valid storage types :

a) CPU b) keyboard c)Pendrive d) Track ball

5) What is the full form of CD-

a) Computer Disk b) Compact Disk c) a and b both d) None of thex

6) 1 Byte = ?

a) 2 bits b) 8 bits c) 4 bits d) 6 bits

7) How many types of computer :

a) Two b) There c) Four d) Five

8) What is the temporary memory unit of computer :

a) ROM b)LAN c)WAN d)RAM

9) which of the following is the processing unit of the computer:

a) CPU b) Memory c)Graphic card d) Mother board

10) Modern Computer are very reliable but they are not

a) Fast b) Powerful c) Infallible d) Cheap

**Saltora Netaji Centenary College**

**B.A. 5th Semester (Honours) Test Examination- 2023-24**

**Subject: SANSKRIT**

**Course ID: 50911** **Course Code: AH/SNS/501C-11**

**Course Title: Sanskrit Grammar**

**Time: 2 hrs** **Full Marks: 40**

**1. यथेच्छमेकः प्रश्नः समाधेयः।** **10×1= 10**

a) प्रातिपदिकम् किं भवति ? 'प्रातिपदिकार्थे लिङ्गपरिमाणवचनमात्रे प्रथमा' – सुत्रमिदमालोच्यताम् ?

b) षष्ठी तत्पुरुषसमासस्य निषेधविधायकानि सूत्राणि उदाहरणसहयोगेन लेख्यानि ?

c) 'समासश्चचतुर्विधः इति तु प्रायोवादः' – व्याख्यायताम् ?

**2. अधोलिखितेषु चत्वारः प्रश्नाः समाधेयाः ।** **5×4=20**

a) यथेच्छमेकं सूत्रम् व्याख्येयम् ।

'रूच्यर्थानां प्रीयमाणः" अथवा 'चार्थे द्वन्द्वः'

b) यथेच्छमेकं व्याख्यायताम् ।

'अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैः'

अथवा

विनापि तद्योगं तृतीया, 'वृद्धो यूना _' इत्यादिनिर्देशात् ।

c) यथेच्छमेकस्य रूपसिद्धिः कार्या ।

अहिनकुलम्, कण्ठेकालः

d) यथेच्छमेकस्य रूपसिद्धिः कार्या ।

निर्मक्षिकम्, वीणापाणिः

e) यथेच्छमेकं व्याख्यायताम् ।

'अतएव ज्ञापकात् व्यधिकरणपदोवहुव्रीहिः'

अथवा

'विशेषणं विशेष्येण बहुलम्'

**3. अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः।** **2×5=10**

a) अपवर्गे तृतीया कदा भवति ?

b) अधिकरणम् कतिविधम् कानि च तानि ? सोदाहरणं लिखत ।

c) 'ओदनं भुञ्जानो <u>विषं</u> भुङ्क्ते' – रेखाङ्कितपदे केन सूत्रेण किं कारकम् भवति ?

d) स्पृहधातोः योगेन का विभक्तिः भवति ? प्रासङ्गिकसूत्रम् उदाहरणसहयोगेन लिख्यताम् ?

e) किम् उपसर्जनम् ? प्रासङ्गिकसूत्रम् लिख्यताम् ?

f) सहसुपा सूत्रे योगविभागस्य केन प्रयोजनं अस्ति ?

g) व्यातिहार-वहुव्रीहिसमासविधायकम् सूत्रमुल्लिख्य एकम् उदाहरणम् प्रदेयम् ?

## Saltora Netaji Centenary College
## B.A. 5th Semester (Honours) Test Examination - A.Y 2023-24
## Sanskrit (Honours)

**Course Id: 50912** **Course Code: AHSNS 502C-12**

**Course Title: Indian Epigraphy, Palaeography and Chronology**

Time -2 hours — Full Marks -40

**१. एकः प्रश्नः समाधेयः।** **10x1=10**

क) जुनागडशिलालेखस्य गुरुत्वं वैशिष्ट्यं च वर्ण्यताम् ।

ख) ब्राह्मीलिपेः उत्पत्तिविषये मतान्याश्रित्य कश्चनः लघुनिबन्धः लिख्यताम्।

ग) समुद्रगुप्तस्य एराण-स्तम्भलेखस्य गुरुत्वं वैशिष्ट्यं च आलोच्यताम्।

**२. केचन चत्वारः प्रश्नाः समाधेयाः।** **5X4=20**

क) विक्रमसंवत् इति विषये टीका लेख्या।

ख) खरोष्ठीलिपेः परिचयः लिख्यताम्।

ग) अशोकस्य सारनाथलघुस्तम्भाभिलेखः आलोच्यताम्।

छ) अभिलेखे तिथ्याङ्कनपद्धतिः कथमासीत् संक्षेपेण लिखत ?

ज) "पूर्वापराकरावन्त्यनूपनीवृदा नर्तसूराष्ट्रश्वन-मरु-कच्छसिन्धु-सौविर कुकुरापरान्तनिषाददीनां समग्राणां...... इति व्यारण्यायताम्।

d) "पलाशिनीप्रभृतीनां नदीनामतिमात्रोद्वृत्तैर्वेगैः सेतुम् यमाणानुरूपप्रतीकारमपि गिरिशिखरतरुतटाट्टालकोपतल्पद्वारशरणोच्छ्रयविध्वंसिना युगनिधनसदृशेन..।" व्याख्यायताम्।

e) "पह्लवेन कुलैपपुत्रेणामात्येन सुविशाखेन यथावदर्थधर्मव्यवहारदर्शनैरनुरागमभिवर्धयता शक्तेन दान्तेनाचपलेनाविस्मितनार्येणाहार्येण।" व्याख्यायताम्।

**३. यथेच्छं पञ्च प्रश्नाः समाधेयाः।** **2x5=10**

क) भारतवर्षे उपलब्धेषु कृतपाठेषु अभिलेखेषु के तावत् प्राचीनतमाः ? तेषां कालः कः?

ख) प्राचीनभारते लेखनोपकरणम् किमासीत् ?

ग) भारतीयपरम्परायां लेखनकलायाः आदिप्रवर्तकः कः ? अस्माकं भारतवर्षे सवपिक्षया प्राचीनतमः पाठोद्धृतः अभिलेखः खलु कः?

घ) 'भारतवर्षः' इति नाम कस्मिन् अभिलेखे प्राप्यते?

ङ) शिशुः बुद्धदेवेन लिपेः ज्ञानं प्राप्तम् इत्यस्य वर्णना कस्मिन् ग्रन्थे अस्ति ? तेन कति संख्यकाः लिपयः ज्ञाताः तस्मिन् ग्रन्थे?

च) अभिलेखः इत्यस्य कोऽर्थः ?

छ) कस्य अभिलेखे भाषाद्वयस्य निर्देशाः प्राप्ता? भाषाद्वयं किम्?

ज) मेहरौली इति स्तम्भलेखे उल्लिखितः वाल्हीकः कः?

---

Saltora Netaji Centenary Calloge

B.A 5th Semester (Honours) Test Examination Ay-2023-24

Subject - SANSKRIT

Course ID: 50916 Course Code: AHSNS-503- DSE-1

Course Title: Kavya (Sahitya darpana-1-3 chapter)

Time: 2hrs Full marks: 40

**1. अधोलिखितेषु प्रश्नेषु यथेच्छं कस्यचिदेकस्य प्रश्नत्तोरं लेख्यम्।** 10×1=10

क) काव्यस्य प्रयोजनं किम् ? साहित्यदर्पणदिशा काव्यप्रयोजनानि निरुपयत।

ख) " वाक्यं स्याद्योग्यताकांक्षासत्तियुक्तः पदोच्चयः "- इति कारिकां व्याख्याय वाक्यलक्षणविवेचनपुरस्सरं तद्भेदान् आलोचयत्।

(ग) नायिकायाः संज्ञा दीयताम् ? नायिका भेदान् सविस्तरं प्रकाशयत।

**२) अधोनिर्दिष्टेषु यथानिर्देशं चत्वारः प्रश्नाः समाधेयाः।** 5×4=20

क) शब्दाः तेषाम् अर्थाश्च कतिविधाः सन्ति ? विस्तरेण प्रतिपादत्।

ख) व्यञ्जनास्वरूपं विलिख्य लक्षणामूला व्यञ्जना उदाहरणेन प्रतिपाद्या।

ग) साहित्यदर्पणदिशा काव्यलक्षणं वर्णयत।

घ) लक्षण लक्षणायाः संज्ञा सह भेदान् उदाहरणयोगेन व्याख्यातम् ?

ङ) रसभेदानुक्त्वा शृंगारस्य भेदौ च वैशद्येन प्रतिपाद्यताम्।

घ) रसय अखण्डत्वम् आलोचयत।

छ) नायकस्य साधारण वैशिष्ट आलोचयत ।

**3) निम्नलिखितेषु प्रश्नेषु पञ्चानां प्रश्नानाम् उत्तरं प्रदेयम्** 2×5=10

क) भोजराजेन मतेन काव्य लक्षणं किम्?

ख) शब्दशक्तयः कतिविधः? तासां नामानि लिखत?

ग) साहित्यदर्पणस्य एकस्याः प्रसिद्धाया : टीका च टीकाकारस्य नामोल्लेखं कुरुत।

घ) महावाक्यस्य संज्ञा लिखत? महावाक्य कैः गठित?

ङ) शान्तरसरथ स्थायीभावः कः १ वर्णश्च प्रकृतिःच किम्?

च) धीरोदात्तः नायकस्य संज्ञा दीयत उदाहरण सहयोगेन।

छ) उदाहरण सह संज्ञा लिखतु - विभावः।

**Saltora Netaji Centenary College**

**B.A. 5th Semester (Honours) Test Examination - A.Y 2023-24**

**Sanskrit (Honours)**

**Course Id: 50917** **Course Code: AHSNS 504DSE-2**

**Course Title: Kavya**

**Time -2 hours** **Full Marks -40**

**1. एकस्य प्रश्नस्य उत्तरं लेख्यम्।** **10×1=10**

a) भारतविवेकानुसारं स्वामिनः विवेकानन्दस्य चरित्रं वर्ण्यताम्।

b) भारतविवेकम् इति नाटकस्य प्रथमदृश्यस्य सारः वर्ण्यताम्।

c) दरिद्रदैवम् इति प्रसहने वक्रेश्वरस्य चरित्रं वर्णयत।

**2. द्वयोः सप्रसङ्गव्याख्या कार्या।** **5×2=10**

a) कन्या कामयते रूपं माता वित्तं पिता गुणम्।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः।।

b) भगवन्तं भवान् कश्चित् कृतवानक्षिगोचरम्।
हित्वाऽस्पष्टवचो ब्रुहि विस्पष्टाक्षरमुत्तरम्।।

C) अगौरवं दूरमुपैतु भारतादुदेतु मातुर्वदने स्मितद्युतिः।
कराश्च मातुर्वितरन्तु मङ्गलं विभातु वेदध्वनिपूरितं जगत्॥

d) गतिहीना नदी मरुभूमौ नश्यति।

**3. द्वयोः सप्रसङ्गव्याख्या कार्या।** **5×2=10**

a) अन्धः कुष्ठी दरिद्रो वा प्रतिवेशी वरं भवेत्।
समानधनगर्वेण स्पर्धमानो हि दुःसहः।।

b) भिक्षापि दुर्लभा जाता शिक्षा धर्ममयी गता।
सर्वत्र तु तिरस्कारः पुरस्कारोऽर्थिनामहो।।

c) चलद्दन्तस्य मे पत्रचर्वने नास्ति योग्यता।
वधिरस्य यथा गीतश्रवणे न प्रवर्तना।।

**3. पञ्चप्रश्नाः समाधेयाः।** **2×5=10**

a) 'भारतविवेकम्' इति नाटकं कदा प्रकाशितम् ? नाटकस्य नायकः कः?

b) 'भारतविवेकम्' इति कीदृशः ग्रन्थः? अस्य रचयिता कः?

c) भारतविवेकम् इति नाटकस्य कस्मिन् अङ्के नरेन्द्रनाथस्य विवाहार्थं घटकोपस्थितिः दृश्यते ?

d) भारतविवेकम् इति नाटकस्य तृतीयदृश्यस्य स्थानम्, समयश्च उल्लिख्यताम्।

e) भारतविवेकम् इति नाटकस्य 'भरतवाक्यम्' लिखत।

f) कं विषयमवलम्ब्य 'दरिद्रदुर्दैवम्' इति प्रहसनं विरचितम्? को वास्य प्रहसनंस्य रचयिता?

g)'यावदस्ति मे दरिद्रस्य दुर्दैवम्' इत्यस्य वक्ता कः? वक्तुं स्वभावः कीदृशः?

i) 'अरे पात्रेसमितौ'...... इत्यस्य वक्ता कः ? पात्रेसमितौ इति पदेन कयोः बोधो जायते ?

---